
N.A.
Jagadishi vishes vyapti
जागदीशी विशेष व्याप्ति
Sanskrit
Paper - Handwritten
N.A. (Very old)
16 folio
14.6" x 4.7"
Complete

१०७६ — नं ५६

जागदीशी विशेषव्याप्तिः





श्रीगणेशायनमः॥द्रव्यंपृथिवीत्वादित्यादौनव्याप्यभावादाहनानात्वकेति जातित्वेनशब्दत्वेनवानानात्वकेःसाध्यतायामव्याप्यभावात्
रूपादीत्युक्तंरूपवान्रसादित्यादौयद्रूपव्यक्तेःप्रतियोगिव्यधिकरणयद्रससंबंधिनिष्ठाभावाप्रतियोगित्वंतद्रूपसामानाधिकरण्यस्यतत्
द्रसव्यक्तौव्याप्तित्वसंभवादाहैकात्म्यकेति।रूपवान्तद्रसादित्याद्यवेकव्यक्तिकेतावव्याप्तिविरहात्पृथिवीत्वादित्युक्तंअव्याप्तिरितिरूपमा
त्रस्यैवचालनीन्यायेनतत्तत्पृथिवीनिष्ठप्रतियोगिव्याधिकरणाभावप्रतियोगित्वादितिभावः नचेतिकथावाच्यमितिपरेणान्वयःसाध्यव्या
प्तिःतथाचसाध्यव्यापकत्वंअज्ञातमेवेतिभावः।रूपवत्वंरूपाधिकरणत्वंतदव्यधिकरणभेदात्भिन्नमेवेत्युक्तदोषतादवस्थ्यादाह नचेति
।रूपत्वपृथिवीत्वयोःसाक्षादसामानाधिकरण्यात्कथंतयोर्व्याप्तिरतआहपरंपरयेति।स्वाश्रयाधिकरणत्वरूपपरंपरासंबंधेनेत्यर्थः
ननुपृथिवीत्ववतिसमवायेनरूपत्वस्याभावसत्वात्कथंतन्निष्ठाभावाप्रतियोगित्वंअतआहतेनचेतिपरंपरासंबंधेनचेत्यर्थःतदभावेरू
पत्वादेरभावेऽपिप्रतियोगितावच्छेदकसंबंधेनप्रतियोग्यनधिकरणीभूतहेतुमन्निष्ठाभावस्यसाध्यतावच्छेदकसंबंधावच्छिन्नायाएवप्रतियो
गितायाःलक्षणघटकत्वादितिभावःअसाध्यत्वमनुमितित्वविधेयत्वंतथाचरूपवतीपृथिवीत्यनुमितिर्नस्यात्तस्याचरूपत्ववतीपृ
थिवीतिभावःननूक्तव्याप्तिज्ञानात्रूपत्वादिसाध्यकैवानुमितिर्व्याप्त्यंतरज्ञानादेवरूपादिसाध्यकानुमितेःसंभवादास्यवत्तिरूप

जा॥वि॥
१

४१ अथ प्रतियोगिवैयधिकरण्योपादानेपि तस्य प्रतियोगितावच्छेदकावच्छिन्नार्थकत्वं यावद्विशिष्टसत्ताभावमादायाव्याप्तिः संभवत्येवेति वाच्यं साध्यतावच्छेदकावच्छिन्नाधिकरणत्व
प्रतियोग्यधिकरणत्वोभयमात्रावच्छेदकत्वविवक्षणात् तस्यैव प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यार्थकत्वमिति प्रेत्य कं प्रतियोगिवैयधिकरण्यस्यानुपादेयत्वादिति

त्वावच्छिन्नवत्तासंबंधेन रूपादेः साध्यतायामुक्तव्याप्तिज्ञानादपि रूपादिसाध्यकानुमित्युत्पादे बाधकाभावाद् अतत आह द्रव्यत्वा
दीति। अव्याप्तिरिति। व्याप्यवृत्तिसाध्यकस्थले प्रतियोगिवैयधिकरण्यस्यानुपादेयत्वात् तत्र तल्लक्षणस्याव्याप्तिरित्यर्थः। यद्यप्यसं
भवएव तल्लक्षणमुचितः सर्वथैव विशिष्टाभावो नमुत्वावच्छिन्नाभावसंभवात् तादृशाभावापि द्रव्यत्वावच्छिन्नप्रतियोगिताया आसज्यवृत्ति
त्वांगीकारे तद्रूपवान् तद्रसादित्यादौ प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितापर्याप्त्यधिकरणभिन्नत्वं
साध्ये संभवतीति नासंभवतीति तन्नोक्तो ननु तत्र हेतुमन्निष्ठाभावस्य प्रतियोगित्ववैशिष्ट्यानवच्छिन्नं वाच्यमतो नाव्याप्तिरित्यत आ
ह अन्यथेति। ननु विशेष्यवति विशिष्टाभावो विशेषणाभावरूप एवेति द्रव्यनिष्ठस्य द्रव्यान्यत्वविशिष्टसत्ताभावस्य प्रतियोगित्वं द्रव्यान्यत्वा
दौ विशेषण एव न तु विशेष्यसत्तायामतो नाव्याप्तिरित्यत आह अनुत्पादइष्यत इति। विशिष्टाभावस्तावदतिरिच्यतां रूपाद्रसे च तदन्य मात्र
त्वविशिष्टसत्ता नास्तीति प्रतीतिबलात् तद्द्रव्यनिष्ठाभावस्य वैशिष्ट्यावच्छिन्नप्रतियोगित्वं पुनः सत्तायामावश्यकमन्यथा विशिष्टसत्ता
वान् जातेरित्यादौ अतिव्याप्त्यापत्तेरिति भावः। केचित्तु ननु विशेषणविशेष्ययोः संबंधाभावपर्यवसन्नस्य विशिष्टाभावस्य प्रतियो

ति x

प्रा
०

जा॥ वि॥ गित्वंतदुभयोःसंबंधएवनतुविशेष्यइत्यव्याप्यनवकाशइत्यतआह अन्यथेति।विशेष्यस्यविशिष्टाभावप्रतियोगित्वमित्यर्थः।ननुलक्षणा
२ तिप्रसंगवारणान्यथानुपपत्तिर्नवस्तुसाधिकेत्यतआह व्यत्यादइष्यतइतिप्राहुः।ननुसाध्यतावच्छेदकवह्नित्वावच्छिन्नप्र
तियोगित्वंतदन्यत्वेनहेतुमन्निष्ठाभावप्रतियोगित्वंनिवेशनीयमतोनोक्ताव्याप्त्यतिव्याप्तीअतआह द्रव्यत्वादीतितच्चाचसत्वगुणत्वोभया
भावस्यद्रव्येसत्वात्तमादायसत्तावान्द्रव्यत्वादित्यादौअव्याप्तिःयद्यपि चसाध्यतावच्छेदकभिन्नोयःसाध्यनिष्ठोधर्मःतदनवच्छिन्नोवहेतुम
न्निष्ठाभावस्यप्रतियोगितानिवेशनीयेत्युक्ताव्याप्त्यादिव्युदासः।तथापिप्रमेयवान्द्रव्यत्वादित्यादवव्याप्त्यापत्तिः।घटत्वावच्छिन्नाभा
वस्यतादृशधर्मानवच्छिन्नत्वात्प्रमेयत्वावच्छिन्नाभावस्यचाप्रसिद्धत्वादितिभावः।सार्वभौममतमुपपादयति अथेति।प्रतियोगित्वमुक्ते
कप्रतियोगित्वंतस्यार्थः।प्रतियोगित्वाभावोहेतुमन्निष्ठाभावप्रतियोगित्वाभावः।ननुतादृशप्रतियोग्यन्यत्वंभेदमात्रस्यव्याप्यवृत्तित्वेन
तदवच्छेदकस्यासंभवइतिभावः।नन्वेवंतद्रूपवान्पृथिवीत्वादित्यादावतिव्याप्तिःतद्रूपेपिरूपत्वाद्यवच्छेदेनतादृशप्रतियोगित्वाभाव जा॥ वि॥
७।।ननुयेनरूपेणयत्रतद्व्याप्यत्वंहेतावित्येवसम्यगतआह प्रतियोगित्व
३

सत्वात्॥अतोधर्मविशेषमंतर्भाव्यप्रतिसचेति।तथाचहेतुमन्निष्ठाभावप्रतियोगित्वाभावोरूपादेरस्तीत्यर्थः।प्रमाणद्रूपत्वादि

नेति।प्रतियोगितायाइति।पृथिवीनिष्ठाभावप्रतियोगितायाइत्यर्थः।अवच्छेदकत्वाभावइति।प्रात्यक्षिकप्रतीत्यभिप्रायेणतथाविधस्व

शब्दस्यतुतादृशप्रतियोगित्वंनरूपत्वाद्यवच्छेद्यमित्यर्थोग्राह्यः।तदभावेति।तादृशप्रतियोगित्वाभावेत्यर्थः।अवच्छेदकत्वाभावइति।

तथाचोक्तलक्षणाप्रसिद्धिरित्यर्थः।रूपत्वावच्छेदेनतादृशप्रतियोगित्वाभावेबाधकमाह।सर्वथेति।रूपत्वस्यानतिरिक्तवृत्तित्वरूपावच्छे

दकत्वविषयीकरणाय।नत्वनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिरूपत्वावच्छेदेनप्रतियोगित्वावगाहिज्ञानंनस्वरूपतस्तदवच्छे

दकत्वावगाहिप्रतियोगित्वाभाववत्ताज्ञानप्रतिबंधकमित्यतआह।तत्कथापीति।रूपत्वसामानाधिकरण्येनतादृशप्रतियोगित्वा

वत्र भावसूचनाय।तथाचसामानाधिकरण्येनबाधज्ञानसत्वाद्रूपत्वावच्छेदेनतादृशप्रतियोगित्वाभाववत्ताज्ञानंनसंभवतीभावः

ह्नन्निष्ठतादृशप्रतियोगित्वमिवतदभावोप्यव्याप्यवृत्तिरितितत्तद्रूपावच्छेदेनतादृशप्रतियोगित्वाभावस्याप्यभावसत्वात्॥अबाधि

मन्निष्ठाभावप्रतियोगित्वाभावावच्छेदकीभूतोधर्मः तदवच्छिन्नसामानाधिकरण्यमेवतद्धर्मावच्छिन्नस्यव्याप्तिरितिभावः॥रूपवान्पृथिवीत्वादित्यादावव्याप्तिमुद्ध

तिरूपितेनातीतानांरूपावच्छेदकपृथिवीत्वादि

७ उ तच्च दंडो न घटजनक इत्यादिप्रतीत्यापत्तिः

जा॥ वि॥ नापितादृशप्रतीतिर्निर्बाधिकेत्यत आह अन्यथेति। घटजनकत्वं दंडत्वेन न तु द्रव्यत्वादिना घटसामान्याभावप्रतियोगित्वं घटत्वेन न तु तद्घट
३ त्वेनेत्यादिप्रतीत्या द्रव्यत्वाद्यवच्छेदेन दंडादौ घटजनकत्वाद्यभावः तद्घटत्वाद्यवच्छेदेन घटाभावप्रतियोगित्वाभावः घटादौ
सिद्ध इति भावः प्रतिबंधेरनुत्तरत्वादाह प्रमेयेति। स्ववचनत्वाच्चेति। तथा च प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्तिरिति भावः
सार्वभौमाकृयार्थीसंकते अथेति। तथा च साधननिष्ठसाध्यसामानाधिकरण्यनिरूपकतावच्छेदकयद्धर्मावच्छेदेन हेतुमन्नि
ष्ठाभावप्रतियोगित्वाभावस्तद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यर्थः। अत्र च साधननिष्ठसामानाधिकरण्यनिरूप
कतायाः अवच्छेदकत्वं अनतिरिक्तवृत्तित्वविशिष्टस्वरूपसंबंधविशेषः स्वरूपसंबंधमात्रं वा प्रथमे असमानेति। असमाना
धिकरणो धूमो यस्य तत्प्रायः पिंडस्थवन्हेस्तु इति तमेत्यर्थः न तदवच्छेदकं न धूमनिष्ठसामानाधिकरण्यनिरूपकतानति
रिक्तवृत्तित्वात् तथा च वन्हिमान् धूमादित्यादावव्याप्तिरिति भावः द्वितीये त्वाह केवलेत्यादि। असाध्यत्वं अव्यापकत्वघटत्वा
द्यपेक्षया गुरुतरकंबुग्रीवादिमत्वाद्यवच्छिन्नाधिकरणत्वाप्रसिध्यातस्य सामानाधिकरण्यनिरूपकतानवच्छेदकत्वाभावात् जा॥ वि॥ ३

४ केवलेत्यनतिरिक्तवृत्तित्वोक्तौ तद्दोषतादवस्थ्यादाह

५ तद्धर्मावच्छिन्नस्य

॥५॥ इत्यत्रैवाव्याप्तिरिति केचन स्वरसेन सर्वत्र संभव एव ज्ञाप्यते॥ इत्यादावव्याप्तिरित्यस्यैवासंभवाभिप्रायकत्वादिति केचित्॥ परे तु यत्र च देवदत्तज्ञानविषयत्वकाच्यत्वान्यतरप्रतियो-
गिकस्वरूपसंबंधेन वाच्यत्वस्य साध्यता तत्र केवलान्वयिनि तादृशसंबंधेन प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्य देवदत्तज्ञानविषयत्वस्य तादृशसंबंधेन प्रतियो-
गिव्यधिकरणस्य विशिष्टसंबंधीनिष्ठदेवदत्तज्ञानीयतत्तद्विषयत्वाभावप्रतियोगितावच्छेदकत्वात् लक्षणसमन्वयान्नासंभव इति वदंति॥

दिति भावः॥ अत एव वह्निधूमरूपसमनीतगुरुरूपेण साध्यतायामव्याप्तिरेव तद्धूमतायामपि प्रतियोगित्वाभावव्यक्तेरपि नाव-
च्छेदकमिति स्वर्यं॥ नानिस्तारः इति प्रमेयधूमसाध्यकेऽव्यभिचारिण्यतिव्याप्तेर्निरासेऽपि तत्साध्यकसद्धेतावव्याप्तितादवस्थ्या-
दिति भावः॥ न च पूर्वलक्षणेवात्रापि साधनवन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकं
तद्भिन्नधर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्युक्तौ निस्तार इति वाच्यं तादृशप्रतियोगित्वाभावेऽप्यत्र विशिष्य तत्तत्प्रतियोगित्वाभावकूट-
त्वेन निवेश्यम्। अन्यथा गुरोरवच्छेदकत्वं विनाऽदर्शनत्वापत्तेः। तथा च वह्निमान् धूमादित्यत्रैवाव्याप्तिः धूमनिष्ठाभावप्रतियोगितावच्छेदकीभूताव-
तस्य घटत्वादेः स्वविशिष्टसंबंधिनिष्ठपटाद्यभावीयप्रतियोगित्वाभावानवच्छेदकत्वेन पारिभाषिकावच्छेदकाप्रसिद्धेः। घटादौ पटाद्यभावदत्वा-
प्रतियोगित्वाभावस्य व्याप्यवृत्तित्वेनावच्छेदकानपेक्षणात्। न च तादृशयत्किंचित्प्रतियोगित्वाभावस्यैवानवच्छेदकत्वं निवेश्यं। तथा च घटत्वादेः स्व-
विशिष्टसंबंधिनिष्ठस्य तत्तद्घटाद्यभावस्य प्रतियोगित्वाभावावच्छेदकतयैव पारिभाषिकावच्छेदकत्वमिति वाच्यं। तथा सति धूमनिष्ठाभावप्रति- व॰५
योगितावच्छेदकस्य घटत्वादेर्वह्नित्वादिविशिष्टसंबंधिनिष्ठतत्तद्घटाद्यभावप्रतियोगित्वाभावावच्छेदकत्वात् वह्निमान् धूमादित्यादौ वह्नित्वादेर-

॥ वस्तुतः प्रकृतसाध्यवत्तानिरूपितदैशिकविशेषणतासंबंधेन यदभावप्रतियोग्यधिकरणत्वसामान्याभाववत्त्वं हेतुमतः तदभावप्रतियोगिवृत्तिसाध्यतावच्छेदकधर्मावच्छिन्नसामा-
नाधिकरण्यं व्याप्तिरित्यत्र मूलतात्पर्यं। न रूपवान् पृथिवीत्वादित्यादौ तत्तद्रूपाभावमादाय व्याप्तिर्न घासत्तावान् जातेरित्यत्र विशिष्टसत्ताद्यभावमादाय व्याप्तिः। सत्तावत्त्वनिरूपितविशेषणतया
विशिष्टसत्ताभावप्रतियोगिवत्त्वस्य गुणादौ वपि सत्त्वात् विशिष्टसत्तावान् जातेरित्यादौ तु विशिष्टसत्ताभावप्रतियोगिमत्त्वपि गुणादेर्न विशिष्टसत्त्वाधिकरणतानिरूपितस्वरूपसंबंधेन॥

कुठ्राघवतो नाविव्याप्ती इति गुरुधूमसत्ता

ग॰ ११

जा॥ वि॥ पित्यादिज्ञापिकावच्छेदकत्वापत्तेरितिभावः। वस्तुतस्तु प्रकृतसाध्यवत्तानिरूपितविशेषणताविशेषसंबंधेन यदभावप्रतियोगिव्याप्यधिकरणत्वसा
४ ध्यान्याभाववत्त्वं हेतुमतः तदभावप्रतियोगितावच्छेदकधर्मावच्छिन्नसामानाधिकरण्यमित्यत्र च मूलतात्पर्यान्न रूपवान् पृथिवीत्वादि
त्यादौ तत्तद्रूपाभावमादाय व्याप्तिः। न च नासत्तावान् जातेरित्यादौ विशिष्टसत्ताभावमादाय व्याप्तिः। सत्तावत्त्वनिरूपितविशेषणताविशेषेण वि
५त्व शिष्टसत्ताभावप्रतियोग्यधिकरण्यस्य गुणादावपि सत्त्वात् विशिष्टसत्तावान् जातेरित्यादौ च विशिष्टसत्ताभावप्रतियोगिमतोऽपि गुणादेः विशिष्टसत्ताधि
करणत्वनिरूपितस्वरूपसंबंधेन तद्वत्त्वं नेति न तत्रातिव्याप्तिरिति युक्तमुत्पश्यामः। तादृशेति। हेतुसमानाधिकरणाभावीयेत्यर्थः। पौनरुक्त्य
मपाकर्तुमाह अत्यंताभावगर्भेति॥ सामान्यविशेषेति। व्यापकसाध्यसमानाधिकरणसाधनसजातीयत्वं सामान्यं तच्च साध्यनिष्ठभिन्नतादृश
साध्यसामानाधिकरण्यविशेषः तद्घटकमभिप्रेत्याह द्वितीयमवतारयति। प्रथमेति। तथा च साधनवन्निष्ठान्योन्याभावप्रतियोगिस्वाद्यप्रथमक वा
साध्यसामानाधिकरण्यरूपस्य प्रथमलक्षणार्थस्य साध्याधिकरणताघटितनिवेशेन गुरुतया तदपेक्षया लाघवादेव साधनवन्निष्ठान्योन्याभा
वप्रतियोगिसाध्यवत्त्वपर्यवसितं द्वितीयलक्षणमुक्तमित्यर्थः। तद्रूपवान् तद्रसादित्याद्येकव्यक्तिकसाध्यकस्थले अन्योन्याभावस्याप्र जा॥ वि॥
४
वा

तियोग्यवृत्तित्वविवक्षया अन्याप्तिवारणसंभवादाह नानात्वमिति नानैवत्यक्तिराश्रयो यस्य तादृशसाध्यकेत्यर्थः न चाच तत्तद्व्यक्तिभेदमादा
य वह्निमान् धूमात् द्रव्यं पृथिवीत्वात् इत्यादावव्याप्तिरिति भावः ननु हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्य
वत्त्वविवक्षणान्नैष दोष इत्यत आह तत्र साध्यवत्त्वस्य चेति तदवच्छेदकत्वादित्यन्वयः तथा च वह्निमान् धूमात् रूपवत्त्वाद्व्यापकजातिमा
त्व त्व न् रूपत्वादित्यादौ तत्तद्वह्निमत्त्वावच्छिन्नभेदं नीलरूपी तत्त्वावच्छिन्नभेदं चादायाव्याप्तिरिति भावः न्यग्रूपेति अधिकरणभेदेप्येकध
र्मावच्छिन्नाधिकरणत्वस्यैक्यमतेनेदं अन्यथा वह्नित्वावच्छिन्नवत्त्वस्यापि पर्वतादौ नानात्वेन तद्दोषतादवस्थ्यापत्तेः हेतुमन्निष्ठान्योन्याभावप्र
तियोगितानवच्छेदकत्वसामान्ये यद्रूपावच्छिन्नं तन्निवृत्ति तद्रूपावच्छिन्नसामानाधिकरण्ये तात्पर्यं ननु यद्रूपावच्छिन्नवत्त्वमित्यत्र यत्पदस्याखं
डधर्मरत्वे वह्निमान् धूमादित्यादावव्याप्तिः वह्नित्वादेरखंडत्वात् अखंडधर्मपरत्वे च वह्निसंयोगवान् धूमादित्यादौ तथेत्यत आह वह्न्यादा
विति तद्वदौ वह्निसंयोगवदादौ वह्नित्वादिकमेवेति तथा च सर्वत्रैव यत्पदेनाखंडधर्मो वक्तव्य इति भावः तादृशेति हेतुसमानाधिकरणेत्य
र्थः ननु एवं वह्निसंयोगीत्यत्रापि निर्वाप्यस्यात् तादृशसंयोगत्वस्य व्यापकतानवच्छेदकत्वेन अत्रापि तैस्तदवच्छिन्नविधेयताकत्वासंभवात् अतः

साध्यसाधनभेदेन व्याप्तेर्नानात्वात् अननुगतैव सा वाच्या इत्याह पत्र्वादिति द्रव्यं पृथिवीत्यादौ यत्साध्यं तादृशान्योन्याभावप्रतियोगितावच्छे
दकमित्येव वक्तव्यम् अत एवेदं द्रव्यमित्याद्यनुमितौ निरवच्छिन्नद्रव्यत्वनिष्ठविधेयताकत्वमपि सर्वसिद्धं संगच्छते निरुक्तव्याप्तेस्तादृशा
नुमितावेव प्रयोजकत्वादिति भावः वह्निमान् धूमादित्यादिकमभिप्रेत्याह यद्रूपावच्छिन्नमिति अधिकरणत्वमिति शेषः तेन प्रागुक्तदो
षो न स्यात् एवमग्रेऽपि वह्निसंयोगवानित्यादिकमभिप्रेत्याह यादृशेति उक्तनिरूपादिसाध्यकपृथिवीत्वादावव्याप्तिरित्यर्थः ॥
अकिंचित्करं व्यधिकरणयोर्व्याप्यभावप्रयोजकं तात्पर्यमिति तथाच सामानाधिकरण्येन व्यापकत्वेनैव तादृशप्रतियोगित्वोपन्यास इति
भावः व्यधिकरणपदैर्विशिकव्याप्यसंभवात् तादृशव्याप्योर्युगपदुत्पादविनाशयोरकिंचित्करत्वादाह व्याप्तिरेवेत्यस्येति अर्थान्तरत्वमपा
कर्तुमवतारयति अन्योन्येति लक्षणस्यैकत्वमविवक्षितं तानद्भेदस्यापि प्रत्यभिज्ञानात् न च का गतिरित्यत आह तथैवेति अभेदस्याबाधि
तत्वाच्चेत्यर्थः अत्र घटभूतलमानेति अनुव्यवसीयमानसंयोगिभेदविषयकत्वमाह इत्यर्थः विशिष्टत्वादौ तथात्वाच्छिखिनो धर्मिणः सत्वेऽपि शि
खी विनष्ट इति प्रतीत्या विशेषणीभूतशिखाया एव ध्वंसरूपोऽभावोऽवगम्यते तथा संयोग्यभेदेऽपि न संयोगीति प्रतीत्या विशेषणस्य सं ।५।

४४ विशेषाल्लक्षणादि प्रायेण मूलं पेजयति चापीति

योगस्यैवाभावोऽप्रसिद्ध इत्यर्थः ॥ नन्वेवं गुणेन संयोगीति प्रतीतेरपि संयोगाभाव एव विषयोऽस्तु न तु संयोगिभेदः ॥ तथा च संयोगी सत्त्वादित्या
दौ निरुक्तलक्षणातिव्याप्तिरत आह यद्यपीति भेदवत् संयोगिभेदवत् तदभावस्य संयोगिभेदाभावस्य तदुपपत्तिरिति ॥ एकधर्मिणि संयो
म. गिभेदतदभावयोर्निश्चयोपपत्तेरित्यर्थः ॥ वस्तुतोऽप्रत्यक्षाणां संयोगिभेदस्याव्याप्यवृत्तित्वोपगमात् वृक्षे संयोगित्वावच्छिन्नभेदस्य सत्त्वे
× ऽपि नक्षतिः ॥ अत्यन्ताभावगर्भायाः प्रतियोग्यसमानाधिकरणत्वेन तेनैवान्योन्याभावगर्भाया व्याप्तिव्याप्तेः स्वप्रतियोगित्वावच्छिन्नभि म म
विशेषणान्तत्वेन हेत्वधिकरणवृत्तिकपिसंयोग्येतत्त्वादित्यादावव्याप्त्यसंभवात् ॥ न चैवमन्योन्याभावस्येत्यादिमूलासंगतिः ॥ कपिसंयोगि
× त्वावच्छिन्नभेदस्यैव कपिसंयोगिभेदप्रतियोगित्वावच्छिन्नभेदस्यापि मूलावच्छेदेन वृक्षे सत्त्वमाशंक्यैव तदवतारात् ॥ अभेदस्येत्या
दिमूलस्यापि कपिसंयोगिभेदप्रतियोगित्वावच्छिन्नाभेदस्येत्यर्थकत्वादित्यसमञ्जसमुच्चरणम् ॥ ननु कपिसंयोगिभेदस्यात्यन्ताभावो न प्रति
योगितावच्छेदकीभूतसंयोगादिरूपो येनाव्याप्यवृत्तेस्तस्य भेदेन समं विरोधो न स्यात् किं त्वतिरिक्त एवेति तद्विरोधो दुर्वार इत्यत आ
ह यत्रापीति ॥ ननु प्रकृतलक्षणे यदत्यन्ताभावस्याग्रहः तस्यैव तदत्यन्ताभावाभावत्वे प्रतियोगिव्याप्यवत्त्वस्यापि तथात्वापत्तिरत आह

सर्थे:

॥ जा॥ वि॥ अभावेनेति ननु घटाभावाभावो न घटः अभावत्वेनाव्यवह्रियमाणत्वात् तत्स्वरूपासिद्धिमाह अभावव्यवहाराद्येनेत्यवधारणे इत्यपि
६ कश्चित् । तदसत्ताभावस्याभावव्यवहाराद्येनेति सएव प्रतियोगितावच्छेदकावच्छिन्न एव ननु बहूनां संयोगव्यक्तीनां संयोगिभे
दाभावत्वकल्पने गौरवात् अभावत्वप्रतीतेः प्रमात्वान्नैरोद्धाच्चातिरिक्त एव संयोगिभेदाभावकल्पना हि इत्यत आह आधिक्येपीति अ
ग्रे वृक्षः कपिसंयोगिभिन्न इत्यादिप्रतीत्या अग्रावच्छेदेनैव भेदाभावग्रहादिति भावः अव्याप्यवृत्तित्वादिति न चाचैकत्र भेदतदभाव
योः संभवात् न मिथो बाधकत्वमिति भावः एवं भेदस्याव्याप्यवृत्तित्वादेव तथा भेदबाधकं असंभवादिना कपिसंयोगात्मक
स्य अतिरिक्तस्य वा संयोगिभेदाभावस्य मूलावच्छेदेनत्वासंभवादित्यर्थः तथाचोक्तप्रतीतेर्विषयबाधमुक्त्वा स्वरूपबाधमप्याह
अ सिद्धेश्चेति मूलावच्छेदेन भेदस्यैव प्रत्ययात् मूले वृक्षः कपिसंयोगिभिन्न इति ज्ञानस्यैवासिद्धेरित्यर्थः ज्ञानमिति तथेति पूर्वोक्ता
नुभवः एवमपि तद्वृत्तित्वे सत्येव तज्ज्ञानं कपिसंयोगिभिन्नभेदज्ञानं असिद्धेरिति मूलावच्छेदेन भेदस्यैव प्रत्ययात् तादृशभिन्नभेद
स्यैवासिद्धिरित्यर्थः तथाच स्वरूपबाधमुक्त्वा विषयबाधमाह तद्धर्मवदित्यादि ननु प्रतियोगितावच्छेदकधर्मस्य ॥६॥

तआ
भिन्नभेदत्वं न दृष्टिगोचरमाह नहीति सर्वत्रेति न च घटत्वस्यैकत्वेन घटभिन्नभेदत्वोपगमेपि संयोगव्यक्तीनां अनेकत्वात् तेषु संयोगिभिन्नभे
दत्वापेक्षया लाघवादतिरिक्त एव संयोगिभिन्नभेदोऽनुगतमिति वाच्यं तथात्वेपि तस्याव्याप्यवृत्तित्वात् अन्यथा मूलेव वृक्षः कपिसंयोगिभि
ति प्रतीतेः न्नो नेति प्रमात्वापत्तेरिति भावः अत एव पुरास्तमिति परेणान्वयः आधेयो स्वसंतानावच्छिन्नोद्विनोन विरोधः संकोच्यतां अंस नोत्रमवि न्नतियोगि
3 नं षयत्वेन कल्प्यतां न नु वृक्षमूलावच्छेदेन संयोग इति प्रतीतेः संयोगवच्छेदविषयकत्वमिति कल्प्यतामित्याद्ययोरपि संकोचे मानाभा
वइत्यत आह नहीति संयोगस्यैव तद्वतोपि कचिदुपस्थितिसंभवात् नियमत इत्युक्तं अनुपस्थितेरिति तथा च कारणबाधादेव तादृशप्र
तीतेर्न संयोगिभेदावगाहित्वमिति भावः अनुभवबाधमप्याह प्रतियोगीति अभावांशे साक्षात्परंपरया वा अप्रकारत्वेन संयोगवतोऽनु अ
व्यवसायेनाग्रहणादित्यर्थः आसमानप्रगुपस्थितं यद्विशेषणं संयोगस्तदभावविषयत्वेनेत्यर्थः अनिमयोरन्योन्याभावप्रतियोगि
तावच्छेदकयोः स्वसंकोचनामिति पूर्वेणान्वयः विषवेति तथा च घटभेद घटत्वादीनां विरोधस्यल्कृत्वेपि संयोगतद्भेदयोस्त व
थात्वे मानाभावादातस्याव्याप्यवृत्तित्वे बाधकाभाव इति भावः ननु संयोगिभेदो नावच्छिन्नवृत्तिको अन्योन्याभावत्वात् घटभेदवदि
ते से

ज्ञा॥ वि॥ न्नुमानात् संयोगिभेदस्याव्याप्यवृत्तिकत्वसिद्धावर्थद्वयसंपन्न एवं संयोगेन समवेतस्य विरोधः संयोगिभेदो न संयोगवद्वृत्तिः संयोगि
७ भेदत्वात् घटत्वाद्यभाववदिति व्यतिरेकिणा तस्याव्याप्यवृत्तित्वं साध्यमित्यत आह अत एव नाभावेतिरुक्तबाधितेति । विशिष्टाभावच्छेद
भेत्यादिः । तथा च संयोगिभेदोऽनवच्छिन्नवृत्तिकत्वाभावत्वेन प्रमीयमाणत्वादित्यनुमानप्रतिबंधात् । अनवच्छिन्नवृत्तिकत्वादभावकल्पनं माने
नमेवास्तु क्यमिति भावः । ननु मूलेऽवच्छेदेन संयोगीति प्रतीतेः सिखी विनष्ट इतिवत् स्वासमानाधिकरणविशेषणाभावविषयकत्वं यदुक्तं ३
तद्दृष्टांते वैषम्यमाह किं चेति विशिष्टेति । सिखिनि तत्प्रघात साक्षात् ध्वंसबाधात् विशेषणध्वंसेति तथा च सिखी विनष्ट इत्यत्र स्व
वृत्तिशिखाप्रतियोगिकत्वरूपपरंपरासंबंधेनैव शिखिनो ध्वंसे प्रकारत्वमित्याशयः । ननु चैवं सत्यपि प्रकृते शिखी विनष्ट इतिवत् प्रकृ
वि वेपि नष्ट इत्यपि प्रतीतिः स्यादिति वाच्यं । तत्र विशेषध्वंसादौ तद्विशेषणावच्छिन्नस्यैव निरूपकपरंपरया संसर्गत्वात् अत एवायं
घटस्याभावो भविष्यतीत्यादौ स्यात्स्वरूपनिष्ठप्रतियोगितायाः प्रागभावे स्वासमानरूपावच्छिन्नस्य संसर्गत्वेपि न घटत्वविशिष्टस्य संसर्गत्व ॥७॥

७ ८

प
मतस्तत्रैव घटोऽनविष्यतीत्यादिकं न प्रत्यक्षमिति ध्येयं। विशिष्टधीभेदमित्यस्यच्छेदत्वेनेति शेषः। कथमिति ताद्दृक्प्रतीतावत्यंताभावत्वात् उल्लेखा नु
दिति भावः। एकोल्लेखविप्रतिपसस्य जन्यावमाद्दिलोपगमेऽप्रमामात्रस्योच्छेदइत्याह नचास्त्विति बाधकैः कारणबाधादिभिः। अस्वक्यतइति अन्य
ज याससंकोरतत्वादिप्रतीत्यपलापापादनेनान्यथाख्यातिनिरसनेजिनं प्रत्नाकरैरिति भावः। तस्या न संयोगीति प्रतीतेर्विषये इति स्ववृत्तिसंयोगमनिह
प्रतियोगित्वसंबंधेन संयोगिनीभेदे प्रकर्षवादिति भावः। अयोऽइति न च संयोगपर्यवसन्नस्यो परंपरयासंयोगिभेदस्य वृक्षे सत्वेपि तस्य व्याप्य भेद
वृत्तित्वेनाप्यानवच्छेद्यत्वादेवनैतादृशप्रत्ययइति वाच्यं तत्रासत्यत्व क्रमेण संयोगाभेदस्य मूलानवच्छेद्यत्वात् मूले न संयोगीत्यपि प्रतीत्यपला वृ
पापत्तेरिति भावः। अस्मद्विशेषणानां प्रामाण्यानुरोधादपि भेदस्याव्याप्यवृत्तित्वं वाच्यमित्यत आह युज्यते चेति अपि ठरपाकानुगमेऽतव्य घटस्य स्या प
मान्यत्वं व्याप्यवृत्तेर्वा न उक्तं दंडाद्यीतिस्याप्रपदस्य गुणेपिसत्वात्। तदत्यंताभावबोधने घटस्योपसर्जनत्वानिबंधन निराकांक्षत्वासन्नवादादहं दं
डीति तु कश्चित् व्यवहारः प्रमाणमिति शेषः। तत्र घटो न स्यामः इत्यादौ विशेषणस्य स्यामत्वं दंडादेरनुयोगिनीति तथानयास
सर्गाभावबोधने तदनुयोगिपदोत्तर सप्तम्यास्तत्रत्वादिति भावः। तदेव द्रढयति न चास्त्विति नन्वत्रत्यके संसर्गाविबोधने काचतिरिति आह तत्र
त्य

(भेद ३)

जा॥ वि॥ चान्वेवेति प्रसंगादि घटात्यंताभावस्य घटेपि सत्वादिति भाव नन्वेवं तत्र नञ्पदरहितायां प्रतियोग्यनुयोगिनो साकांक्षत्वं तत्रैव नञा तदभावो बोध्य

॥५७ ते प्रकृते च घटो घट इत्यस्य निराकांक्षतया न तयापि घटे घटस्य बोद्धे च संसर्गाभावो न बोध्यते कंबुग्रीवादिमान न घट इत्यादिकं च भूतलं न घट इ-

त्यादि निक्षु समानमित्यत आह अपि चेति यद्वा ननु नञा प्रत्यक्षपार्थ विशेषणतापन्नस्यैवात्यंताभावबोधने अनुयोगिनि सत्वम्यपेक्षमान

त्वात् तद्विशेषणतापन्नस्येति यदि ब्रूयात्तदप्याह अपि चेति येन घटो घटयन्स नइत्यादौ नञ्पदरहितायां प्रतियोग्यनुयोगिनो निराकांक्षत्वे-

पि नञा तदभावं बोधनात् तत्रैव घटो न घट इत्यत्राव्यभाव बोधने बाधकाभावइत्याप्युक्तं विशिष्टवाचकेति विशिष्ट बोधकेसर्वंडादंडी

त्यादि वाक्यत्वेन वाचकत्वासंभवात् धर्मीति मतुपर्थसंबंधि विशेषणतयोपस्थितस्येत्यर्थः उपस्थितस्य च वृत्तिशब्दादित्यादिः तेन नी-

प॰ लो घटः घटश्चेत्यादौ घटविशेषणतयोपस्थापितस्यापि नीलादेः घटादावन्वयः नीलघटः पटश्चेत्यादौ च वृत्तिशब्दादेव नीलस्यत-

थोपस्थितिरतः पटे तस्यान्वयः न विशेषणमात्रेति तथा च चैत्रो न दंडीत्यत्र मतुपः पदसाधुतामात्रं फलं न तु शब्दे तदर्थप्रवेशः इति भावः

पूर्वरीत्वादिति यद्यपि भूतलं न घट इत्यत्रैव चैत्रो न दंड इत्यादावपि पूर्वपाक्षिणः दंडात्यंताभावबुद्धि विशिष्टापत्तिः कर्तुं शक्यत एव तथा ॥५७॥

न *प इ

पितन्नासार्थस्यनयात्यंताभावबोधनेतन्नाम्न। प्रथमांतत्वंप्रथमासाकांक्षत्वंवतंत्रमन्यथाग्रेहेदंडस्यनेत्यत्रापिदंडात्यंताभावप्रतीत्याप
त्तेरतश्चैत्रोनदंडीत्यादौदंडपदस्यप्रथमांतत्वस्यप्रथमांतसाकांक्षत्वस्यचअभावात्तदत्यंताभावबोधोनयादृशः चैत्रमैत्रयोर्दंडघटौनेत्या
दियथासंख्यस्थलेचैत्रधर्मिकदंडात्यंताभावबोधेप्रथमांतत्वस्यव्यभिचारेपिप्रथमासाकांक्षत्वमस्त्येव॥ दंडेतरप्रथमायाः सकलप्रक
सर्वाण्यन्वयित्वादितिदिक्॥ एतेनेति। चैत्रोनदंडइत्यादौदंडात्यंताभावाप्रसक्तौचैत्रसर्वस्वविनैवेति। यत्राधिकरणाभावयोराधाराधेयभावः स्ते
संसर्गस्तत्रैवसप्तम्यपेक्षणात्। चैत्रोनदंडीत्यत्रचदंडाभाववतस्तादात्म्यस्यैवचैत्रेसंसर्गत्वात्नसप्तम्यपेक्षेतिभावः॥ ननुचैत्रोनपचती प्रसंगेन
त्यादौपाककृतिरिवचैत्रोनदंडीत्यादेरपिदंडात्यंताभावःसप्तमींविनापिप्रतीयतामतआह एवंचेति। चैत्रोनदंडइत्यादौसंसर्गाभावप्र
ति तीतिःयासप्तम्यपेक्षणेचेत्यर्थः॥ संतीति। शाब्दान्निकमतेन्यायमतेचाहुः लक्षणयावेतिभेदोनास्तद्इतितथाचदृष्टांतासिद्धिरितिभावःन
न्वेवंअनुभवासिद्धस्यकथंताभावबोधस्यापलापः इत्यतआह वस्तुतइति। त्यादिःस्यादिभेदेनविभक्तेर्द्वैविध्यादुदाहरणद्वयंप्रतिपा
दकार्थस्येतिअभावान्वयबोधेनइत्यनुषज्यतेनिपुणतरमितिमत्वान्वयोगिनिप्रतियोग्यन्वयेसप्तम्यपेक्षा तत्रैवनयात्तदत्यंताभावबोध
या

॥ जा॥ वि॥ नेतदपेक्षानतृसवत्रेतिनयदेवं लक्ष्यमाणत्वादितिभावः॥ नेदस्यव्याप्यवतित्ववादिनांप्राचांमतेरनुतादस्याप्यांनस्यामइत्यादिव्यनह

१ म्रमुपपादयति॥ नस इत्यादिना॥ ननुवैधर्म्यमपिभेदएवेतिनद्भवत्वंतत्रबाधितमतआह वैधर्म्यंचेति॥ तद्देसिष्टप्रकात्मावच्छेदेनतद्वृत्तिव

नमानस्याभावस्यप्रतियोगित्वंतद्धर्मविशिष्टस्यवैधर्म्यंतथाचरके॥ नस्यामइत्यत्रस्यामत्ववैशिष्ट्यावच्छेदेनस्यामवृत्त्यभावप्रतियो

गिधर्मवानरक इत्याकारकस्तत्रबोधः ननुपृथक्नतुभिन्नः॥ ननुविशिष्टधीजनकत्वादिगर्भस्यसंबंधत्वस्यप्रवेशेप्यात्माश्रयादि

रेवेत्यत आह निरूपितेति साध्यवान्यस्येति विग्रहे साध्यवत्येवसाधनस्यसंबंधोऽन्वेष्टव्यः स चाधिकरणत्वं नतुव्याप्तेस्तत्र

प्रवेश इतिप्रागेवोक्तमितिभावः मूलेकास्येतिकृत्यत्यादिः तथाच किंहेतुक किं साध्यकानुमितिजनकतावच्छेदिकाकाव्याप्तिरि

त्यर्थः ननतद्धेतुसाध्यकानुमितिंप्रत्यपितद्धेतुसाध्यकनानाविधव्याप्तिज्ञानानांहेतुत्वात्तत्र इयमप्यननुगमएवेत्यत आह

दीधितावर्थंचेति इयमपीत्यर्थः अवक्तत इति॥ तद्धेतुसाध्यकव्यभिचारधीविरोधिधीविषयत्वेनतद्धेतुसाध्यकनिखिलव्याप्तिरेव ॥ १॥

गम्यतद्गोचरज्ञाने जैवतद्धेतुसाध्यकानुमितिं प्रतिहेतुत्वं व्याप्तिग्रहोपायमेव लक्षणइत्यर्थः (त्) लक्षणत्रयस्यैव यथाश्रुतस्य व्याप्तिसंभवादेतेइत्यने
न लक्षणद्वयाभिधानमसंगतमतोव्याचष्टे एतेइति । तथाचान्योन्याभावगर्भत्वेनद्वयोरैक्यदेवद्विवचनोपपत्तिरितिभावः धर्मिणः सिध्यसि
द्धिपराहतत्वात्तदतिरिक्तद्वित्वावच्छिन्नाभावस्यासत्वं शंकितुमशक्यमन्यथावितर्कपातिनः ननुद्वित्वादिनानवत्वेतु तस्याप्रिप्रापइत्यग्रे अन्वयः त्य
स्वद्वित्वादिकं तु समानाधिकरणं यद्घटत्वपटत्वादि तदवच्छिन्नाभावानामित्यर्थः द्वावित्यस्य घटपटावित्यादि तथा च घटौ नास्तीत्यादिप्रत्य
यात् घटपटौ न स्तः इत्यादिप्रत्ययस्य वैलक्षण्यमेव विषयभेदं विनानुपपद्यमानं द्वित्वस्यावच्छेदकत्वं साधयतीति भावः न च द्वित्वविशि प
ष्टाधिकरणत्वावगाहित्वयैव वैलक्षण्यं सुवचमत आह सब्देति । तथा च तत्के घटपटौ न स्त इति प्रतीतेः घटत्वादिप्रत्येकधर्मावच्छिन्ना
भावगोचरत्वे तु तत्के घटो न वेति संशयो न स्यात् बाधनिर्णयसत्वादित्यर्थः इंद्रियेण द्वित्वावच्छिन्नाभावस्य निर्णये द्वाभ्यां संनिकर्षत्वेन
घटत्वादिप्रत्येकधर्मावच्छिन्नाभावस्याप्यवश्यं निर्णय इति तदानीं संशयो न स्यादित्यादस्य सर्वानुभवसिद्धत्वादसब्दादिनेत्युक्तं ननु घटपटौ
न स्त इत्यादौ द्वित्वाश्रयवृत्ति घटत्वादिप्रकारेणाभावस्य निर्णयात्तदानीं तत्के घटो न वेतीत्यादिसंशये बाधकाभावः शुद्धघटत्वप्रका

॥ जा॥ द्वि॥

॥१०

रेणाभावनिर्णयस्यैव तद्विरोधित्वादत आह। विषयेति। घटपटादिप्रत्येकाभावस्याननुगतत्वादितिभावः। आदिनेत्यनेन जणतावच्छेदकानुगमादेवघ
टपटौ न स्त इत्यादिप्रतीतेरनुमताकारत्वमित्यभिप्रायेण संकेतेन चेति। द्वित्वाधिकरणेति। न चात्र घटपटपर्याप्तद्वित्वाश्रयप्रतियोगिकाभाव
त्वेनैव घटादिप्रत्येकाभावस्याननुगमः। ननु घटपटौ न स्त इति प्रतीतेः कुत्रचिद्धर्मे वच्छेदकत्वावगाहित्वस्यानुभवसिद्धत्वात् नोक्तरूपे
णतन्निर्वाह इत्यत आह। द्वित्वसमानेति। मात्रपदेन द्वित्वस्यावच्छेदकत्वव्युदासः। द्वयमित्यस्य घटपटत्वादिसंकीर्णनिरस्यति। नादृशेनेति। तथाच
यत्किंचिद्घटपटोभयपर्याप्तघटपटोभयवत्यपि घटपटौ न स्त इति प्रतीत्यापत्तिरिति भावः। ननु घटत्वपटत्वान्यतरनिरूपितसमवायेनैव घटप
टौ न स्त इत्यत्र धर्मस्य द्वित्वसामानाधिकरण्यं निविष्टमेवं कुड्यकुसूलौ न स्त इत्यादावपि यथायोग्यं तत्कादृशमतो द्वितीयकल्पेनेनापि दोषान्
इत्यत आह। द्वित्वसामानाधिकरण्येति। अत एवेति। यदनुपस्थितिदशायां यादृशप्रतीतिस्तदवगाहित्वस्य तादृशप्रतीतावसंभवादित्यर्थः। परंपरे
ति स्वपर्याप्त्यधिकरणवत्तासंबंधेनेत्यर्थः। तादृशद्वित्वेति। घटपटवृत्तिद्वित्वेत्यर्थः। द्वावित्यस्य घटपटावित्यादिः। द्वयेति प्रतियोगित्वोक्तेर्वि-
विप्रतिपन्नं प्रत्याह। द्वित्वेति। घटपटौ द्वित्ववत्ता प्रत्यक्षेण तुल्यवत्तिवेद्यतया द्वित्वे घटवृत्तित्वावगाहिनेपि नियंत्रितविषये शाब्दस्यापि तदसंभ ॥१०॥

वात्‌अस्माकं तु नीलौ घटो नास्ति इत्यादौ नीलत्वघटत्वाभ्यामिव घटपटौ न स्त इत्यादिशाब्दस्थले घटत्वपटत्वद्वित्वैरवच्छिन्नप्रतियोगिताकस्या-
तिरिक्ताभावस्य बोधान्नानुपपत्तिः। अवच्छेदकत्वस्य चित्तस्य एव पर्याप्तत्वादिति भावः। अत एव वैशिष्ट्यानुपस्थितावप्युक्तप्रतीतेरवनन्वैक २,
विशिष्टापरत्वमेवोभयत्वमिति वैशिष्ट्यानुपस्थितौ घटपटोभयं नास्तीति प्रतीतिरपि द्वैवेत्यत आह विरुद्धयोरितिउक्तप्रायत्वादिति तेन
घटत्वपटत्वयोरेव द्वित्वेनाभावस्य प्रतीतेः सिद्धांतनिरुक्तोक्तत्वेपि न क्षतिः। कुत्रस्य घटत्वाद्यवच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकद्वि
इ त्वमित्यंतकल्पं निरस्यति जांग्रयेति तथात्वेपि द्वित्वादेः क्लृप्तप्रत्येकाभावप्रतियोगितावच्छेदकत्वेपि तादृशाभावे तीसाधनवनिष्ठात्यंताभावेस्य
ननु एतद्दोषनियामकं साध्यतावच्छेदकातिरिक्तव्यासज्यवृत्तिधर्मावच्छिन्नत्वेन प्रतियोगितं विवक्षितं तावताप्युक्तरूप मममेवेति ग्रंथे
नातिरिक्ताभावमंगीकृत्यासिद्धं तैर्प्रश्नकृतो नोचितः अतस्तमपि व्याप्यापयती अंतरेणचेति अभावांतरमिति घटद्वयत्वावच्छिन्नप्रतियोगिताकमित्यादिः
एकैकेति तथाच न घटत्वावच्छिन्नाभावेनान्यथासिद्धिः घटद्वयमिति तथाच तत्र द्वित्वावच्छिन्नाभावेनापि तदन्यथासिद्धिरिति भावः। यद्यपि मावर्त्तो न
५, घटाः प्रत्येकं तन्न द्वटान्ये घटत्वावच्छिन्नाभावे ... क्लृप्ते घटद्वयत्वावच्छिन्नप्रतियोगिताकत्वकल्पने घटद्वयवति घटौ न स्त इत्यस्य न प्रसं
गो न वैकघटवतितादृशप्रत्ययमापत्सङ्गः तथाप्यनं तेषु भावेषु तादृशप्रतियोगिताकत्वकल्पनमपेक्ष्य तेषाविध प्रतियोगिताकस्यैकस्य
त्वेन

ग.ग. अतिरिक्ताभावकल्पनात्‌धीस्तो सिसामान्याभावस्थलइवात्राप्युक्तयुक्तेस्तौल्यात् । नच घटविसिष्टघटत्वावछिन्नाभावस्यैव घटद्वयत्वाव
११ छिन्नप्रतियोगिताकत्वं कल्प्यतन्नु तन्नद्वटान्यघटत्वावछिन्नाभावेनाप्यन्यात् । तत्रच घटविष्टसंस्वनिष्ठभेदप्रतियोगित्वसामानाधिकरण्योभयसं
बंधेन बकवंत्तौ घटद्वयवनिघटौ नेतिप्रत्ययोनेतिवाच्यं । इह कपाले समवायेन घटौ नस्त इतिप्रतीतेस्तादृशाभावेनाप्यन्यथाकर्तुमश
क्यत्वात् । स्वाधिकरणसमवेतत्वसंबंधेन घटविसिष्टस्य घटांत्यंताभावस्याप्रसिद्धत्वादितिभावः । वत्यनियामकसंबंधस्य प्रतियो नर
गितावछेदकत्वोपगमेस्वपर्याप्त्यधिकरणवत्तासंबंधेन घटद्वयपर्याप्तद्वित्वाभावस्यैव घटद्वयत्वावछिन्नप्रतियोगिताकत्वकल्पनसंभ
वात् अंतरेनेत्यादिकं अयुक्तमितिविभावनीयं । ननु साध्यघटितोभयस्य प्रतियोगित्वे सुतरां साध्यस्यापितथात्वमतस्तदुभयामित्यादि
मूलासंगतिरेनेत्यतो व्याचष्टे तदुभयमिति तच्च भावप्रधाननिर्देशः । ननु तथाप्यप्रतियोगित्वगर्भोक्तमस्य चाश्रुतलक्षणान्यव्या
त्यान्यैवेत्यत आह अश्रूयमाणेति । तच्चैवेति प्रतियोगिपदस्य प्रतियोगितावछेदकधर्मपरत्वादितिभावः । केचित्प्रतियोगितावछेदकता
त्वेष्वेव समस्तलक्षणेषु प्रतियोगितानतिरिक्तवृत्तित्वरूपं तदवछेदकत्वमाभिप्रेत्य शंकितं मूले अथोनिस्वरूपसंबंधविशेषरूपमवछे ग.ग.
दकत्वं नविसिष्टमित्याशयेन परिहरति अनभ्युपगमेवेति तदुभयमित्यादौ सर्वत्र धर्मपरोनिर्देश इत्याहुः । स्वपर्स्य साध्यपरत्वेव्याप्ति ११
द

चारिण्यतिव्याप्तिराह स्वमिति तत्र प्रतियोगितापर्यैकसंबंधावच्छिन्नत्वं विशेषणताविशेषावच्छिन्नत्वं च वक्तव्यं तेनायोगोलकभेदत्ववदि वह्निमयि
ज्ञाव् × नत्वाद्धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेपि नातिव्याप्तिः वचनं च नापि विषयितया योगोलकभेदवत्तज्ज्ञानस्याभावीयवि
शेषणतया सो ऽभावः तस्य धूमसमानाधिकरणत्वाद् अतिव्याप्तिरिति वाच्यं तादृशज्ञानस्याभावीयविशेषणतारूपव्यधिकरणसंबं
धावच्छिन्नाभावे अयोगोलकभेदत्वस्य गुरुत्वात् धूमत्वं किं तु पदार्थस्यैव विषयितया अवच्छेदकत्वात् गुरुधर्मस्य अवच्छेदकत्वास्वी
कारे तु प्रतियोगितावच्छेदकतावच्छेदकताप्येकसंबंधेन विवक्षणीया त्मचाश्रुत स्वार्थत्यागे बीजमाह एतेनेति प्रकृतमित्यग्रे ऽन्वयः तादृ
न् सैः साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकैः अवच्छिन्नस्येति अप्रसिद्धिरित्यग्रे ऽन्वयः न तथा च यावत्त्वं नावच्छेदकस्य विशेषणमिति भा
वः तादृशावच्छेदकावच्छिन्नस्यापि यावत्त्वं न विशेषणमित्याह तादृशावच्छिन्नयावत्प्रतियोगिकस्येति अत्राप्यप्रसिद्धिरित्यग्रे ऽन्वयः ननु नु ×
तादृशयावत्प्रतियोगिकक्षयावत्साध्यवच्छिन्नाभावाप्रसिद्धेरित्यत आह अतिप्रसंगकादिनिति तथा च यावत्साध्यवच्छिन्नतादृशाभावमा
दाय धूमवान् वह्नेरित्यादावतिव्याप्तिर्निमित्ता यावत्साध्यवच्छिन्नाभाव एव लक्षणे निवेश्य इति तदप्रसिद्ध्या लक्षणासंभव इति भावः ननु × ज
द्वितीयाप्रत्यंताभाव एव यावत्त्वेन विशेषितः समासानिविष्टेनापि तेन वित्यत्तिवैचित्र्यात् यावत्पदस्याभेदान्वयसंभवादत आह तादृशावच्छि

२१ नेतितथाचाप्रसिद्धिः। तथा च न तत्तत्सर्वेतान्यत्वाद्यभावकूटाधिकरणाप्रसिद्ध्या नानाव्यक्तिवृत्तिसाधनके द्रव्यं पृथिवीत्वादित्यादावव्याप्ति
१२ रिति भावः। अवच्छेदगगनत्वादित्यादावेकव्यक्तिवृत्तिसाधनस्थले तादृशयावदभावत्वं साधनवत्येव प्रसिद्धम् अतः प्राप्यमाह न्युक्तं ननु तादृ
शयावदभावानां प्रत्येकाधिकरणवृत्तित्वं साध्ये वक्तव्यमतो नोक्ताप्रसिद्धिरिति न आह रूपादीति तादृशेति तत्तद्घटान्यत्वाभावकूटस्यापि नि
रूकाभावतया तत्प्रत्येकसामानाधिसामानाधिकरण्यस्य कुत्रापि रूपे असत्वात्। न च तादृशयावदभावानां प्रत्येकसमानाधिकरण
वृत्तित्वं साध्यतावच्छेदकस्य वाच्यमतो नोक्तदोषः दंडिमान् दंडिसंयोगादित्यादावव्याप्तिरिति भावः। यद्यपि तादृशयावदभावानां
प्रत्येकाधिकरणं यद्धर्मावच्छिन्नस्याधिकरणं तत्तद्धर्मावच्छिन्नसामानाधिकरण्यविवक्षमानकोऽपि दोषस्तथापि एतस्यैव फलतः कल्पां
त तरेणाग्रे वक्ष्यमाणत्वात् तानाशंक्येति भावः। ननु यावंतः साधनसमानाधिकरणाभावप्रतियोगिनो मत्समानाधिकरणाभावप्रतियोगि
नइत्यस्यैव सम्यक्त्वे अवच्छेदकद्वयोपादानं व्यर्थं अयं पिंडभेदस्यैव साधनाव्यापकस्य साध्यवन्निष्ठाभावप्रतियोगित्वविरहाद्धूमवा २१
नवन्हेरित्यादिसोपाधावतिव्याप्त्यभावादत आह सर्वत्रेति धूमीतेरिति साध्यन्यूनवृत्तिघटत्वादिविशिष्टत्वेनेत्यर्थः विशिष्टस्यातिरिक्त १२
त्वे तद्वाय पिंडभेदस्य विशिष्टाभावप्रतियोगित्वासंभवादाह आदिनेति तेनाद्वितीयावच्छिन्नतदभावस्योपग्रहः। अत्र साधनव

निष्ठाभावप्रतियोगितायावत्मः साध्यवन्निष्ठाभावप्रतियोगितास्वरूपाहुस्तु तैर्नैषदोषस्तत्वापत्तः पिंडभेदत्ववच्छिन्नप्रतियोगिताव्यक्ते
ता धूमवन्निष्ठाभावप्रतियोगितात्मकत्वात् अनिभ्यात्प्यसंभवादिति ध्येयम् मतांतरमाह अभावयद्धर्मावच्छिन्नेति तथा च मूले तादृशप्रतियो
गिकासंतताभावासमानाधिकरणायस्येतिबहुव्रीहिः नाव्याप्तिरिति न च रूपसामान्याभावाभावस्य रूपइवरूपध्वंसरूपप्रागभा
वयोरपि प्राचीनमते सत्वात् तयोश्चाभावभिन्नयोरपि निखिलमोजलत्वसामानाधिकरण्याभावादेवमप्युक्तव्याप्तितादवस्थ्यमि
ति वाच्यं यद्धर्मावच्छिन्नाभावत्वावच्छेदेन भावभिन्नत्वं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततादृशधर्मावच्छिन्नाभाव एव भावत्ति
न्नो ग्राह्यः इत्यस्य तात्पर्यतया न च रूपसामान्याभावत्वावच्छिन्नाभावत्वावच्छेदेन भावभिन्नत्वं रूप एव व्यभिचारात् अत एव रूपप्रा
गभावसामान्याभावत्वावच्छिन्नाभावस्वरूपानुरूपप्रागभावानप्यादायन दोषः तादृशप्रागभावसामान्याभावत्वावच्छिन्नाभावत्वावच्छेदेन
प्राचीनमते भावभिन्नत्वविरहात् रूपस्यापि तथात्वात् इति रूपध्वंसात्मकताभावत्वस्य स्नेहात्मकहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेपि
तदवच्छिन्नाभावस्य लक्षणाघटकत्वादिति भावः न च स्नेहसमानाधिकरणाभावप्रतियोगितावच्छेदकं जलान्यत्वविशिष्टसत्तात्वं ताभावत्वे यंता
जोन्यत्वविशिष्टसत्ताभावान्यतरत्वावच्छिन्नाभावत्वं तदवच्छिन्नाभावस्य तेजोन्यत्वविशिष्टसत्तात्मताभावस्य जलान्यसामानाधिकरण्याभा ×

१३
१३ वात् अव्याप्तिरिति वाच्यं॥ जलतेजोन्यत्वविशिष्टसत्ताया एव तादृशान्यतरत्वावच्छिन्नाभाववत्तया जलतेजोऽन्यत्वविशिष्टसत्ताभावस्य तदवच्छिन्नप्र
तियोगिताकाभाववत्वात् तस्य च जलत्वसामानाधिकरण्येनाव्याप्तेरनवकाशात् तादृशान्यतरत्वावच्छिन्नाभावरूपत्वेऽपि तदवच्छिन्नाभावस्यै
कस्मिन्नेवोक्तविशिष्टाभावे कल्पयितुमुचितत्वात्॥ ननु घटध्वंसत्ववान् ध्वंसत्वात् इत्यत्रातिव्याप्तिः न च घटध्वंसत्वाभावस्य साध्या
समानाधिकरणत्वात् न तथेति वाच्यं घटध्वंसत्वत्वस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि तदवच्छिन्नाभावत्वावच्छेदेन भावभि
न्नत्वविरहेण घटध्वंसत्वसामान्याभावस्य लक्षणाघटकत्वात् घटध्वंसत्वाभावस्य जन्यत्वे सति भावभेदस्वरूपत्वात् अभावप्रतियोगिका
भावमात्रस्यैवाधिकरणस्वरूपत्वोपगमात् जलत्वादिनिष्ठस्य घटध्वंसत्वाभावस्य भूतलादिभावे पार्थिवसानात् घटत्वाद्यवच्छिन्नाभाव
स्य यावदन्तर्गतस्य सामानाधिकरण्यादिति चेत् अत्र घटध्वंसवृत्तिभावाभाववत्त्वेऽपि तथाचाभावनिष्ठत्वमभावप्रतियोगिकत्वं नानाधिकरणस्व
रूपत्वे तंत्रं अपि तु तत्तदभावमात्रनिष्ठत्वं स्वेनैव नादाय्यैन स्वरूपमात्रवदन्याभावस्य विशिष्टबुद्ध्युपपत्तौ तत्तदभावाभिन्नत्वाद्यभावस्या
त्व तिरिक्तकल्पने मानाभावादिति भाव इत्येवं वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यत् तेजस्त्वाभावसत्ताभावान्यतरत्वावच्छिन्नाभा १३
वत्वं तदवच्छिन्नप्रतियोगिताको योऽभावस्तद्भिन्नो अभावस्तेजस्त्वाभावः सत्ताभावस्तयोर्न साध्यसमानाधिकरण्यं सत्ताभावस्य जलत्ववि १३

रुद्धत्वान्न इत्यादिक्रमेण जलं स्नेहवत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिरिति स्वरसात् इदं तैर्नैकं सांप्रदायिकं पुनः भावाविच्छिन्नत्व
त्मस्य वा स्वविकारसंताभावो ग्राह्य इत्यर्थः तेन प्रागभावकालत्वं ताभावत्वावच्छिन्नाभावानां रूपप्रागभावात्मकानां भावाभिन्नानां जल
त्वसामानाधिकरण्याभावेपि जलं स्नेहवत्त्वादित्यत्र नाव्याप्तिः तादवस्थ्यं ननु घटध्वंसो ध्वंसत्वादित्यत्र व्याप्तिर्भावत्वेन अभावप्रतियोगि
काभावमात्रस्याधिकरणस्वरूपतया घटात्यंताभावादिवत् घटध्वंसत्वाद्यभावस्य घटात्यंताभावादिस्वरूपस्य घटध्वंसत्वसाध्य
समानाधिकरणत्वात् घटध्वंसादिनिष्ठस्य च घटध्वंसत्वाद्यभावस्य च घटध्वंसात्यस्य वा स्ववात्यंताभावत्वविरहेण लक्षणाघटक
त्वात् अत आह घटध्वंसेत्यादि इत्याहुस्तन्न इदं अभावप्रतियोगिकाभावानां अधिकरणस्वरूपतामात्रं किं च घटध्वंसेत्यादेरवतारणे धूम
वन्निष्ठाभावप्रतियोगितावच्छेदकीभूतघटध्वंसत्वत्वावच्छिन्नाभावस्य द्रव्यत्वाभावनिष्ठस्यापि तुल्ययुक्त्या द्रव्यत्वाद्यभावात्मकस्य वह्निसामानाधि
करण्याभावात् वह्निमान्धूमादित्यादावव्याप्तिरेव असंभवेन घटध्वंसो ध्वंसत्वादित्यादाववतिव्याप्तिपर्यंतानुसरणस्य संदर्भविरोधापत्तेः अन
व्याप्त्यभावविशिन्न इत्यत्र भावेन भिन्नः प्रतियोगिविधया सम्बद्धोऽभावमात्रप्रतियोगिक इति यावत् तेन स्नेहवत्त्वसमानाधिकरणस्य हृ
मावत्ति स्वरूपस्याभावस्य प्रतियोगितावच्छेदकं यद्धिमावत्त्वेतरभावत्वं तदवच्छिन्नप्रतियोगिताकभाववह्निमावत्त्वात्यंतगर्भितस्य जलत्वाभावस्य

२४ साध्यासमानाधिकरणत्वेपि जलं स्नेहवत्वादित्यत्रनाव्याप्तिः। वह्निमावत्तेरभावत्वस्याभावइवाभावेपि सत्वात् तदवच्छिन्नाभावस्याभावमात्र
२४ प्रतियोगिकत्वाभावात्। नन्वेवं घटध्वंसो ध्वंसत्वादित्यादावतिव्याप्तिः व्यभिचारनिरूपकघटध्वंसान्यत्वाभाववादेर्भावप्रतियोगिकत्वविर
हेण लक्षणाघटकत्वात् जन्यत्वे सति भावभिन्नत्वपर्यवसन्नस्य ध्वंसत्वस्य भावभिन्नत्वविरहात् घटात्यंताभाववदेनाद्यस्य साध्यसमानाधि
करणत्वादतआह। घटध्वंसेत्यादि ध्वंसत्वादेरिति। भावभिन्नत्वविशिष्टजन्यत्वमेव ध्वंसत्वमखंडधर्मांतरमेव वा तथा च घटध्वंसत्वाभावस्य
वाभावमात्रप्रतियोगिकत्वेनैवउक्तातिव्याप्तिर्वारणीयेत्याशयः। घटध्वंसत्वादेरित्यादिना घटप्रागभावो प्रागभावत्वादित्यादौ घटप्रागभावत्वादेः
परिग्रहः। जन्यत्वे सति भावभिन्नत्वं ध्वंसत्वमित्युक्तावपि न क्षतिः अभावांतरमादायैवातिव्याप्तिनिरासासंभवात् इत्याशयेनाह। तत्प्रकारके
ति भावाभाववृत्तिवृत्तीरित्यनेनानुगतप्रतीतिप्रमाणकत्वं तादृशाभावस्याविष्कृतं अतिरिक्ताभावप्रतियोगिकइत्यर्थः इति प्राहुः। ननु यावंतः स्व
स्वव्यभिचारिणः तद्व्यभिचारिसाध्येत्यर्थे वा वह्निमान्धूमादित्यादौ सर्वत्रासंभवः साधनव्यभिचारिणः प्रमेयत्वद्रव्यत्वादेर्व्यभिचारस्य सा
ध्ये विरहात् अत आह। स्वाभिमतेति। यत्पदस्य साधनपरत्वे सोपाधावतिव्याप्तिरित्याह साध्यत्वेति साध्यव्यापकप्रतियोगिकस्य तत्तद्विपक्षान्यत्वाभा
वकूटस्याधिकरणाप्रसिद्ध्या सद्धेतुमात्रे असंभवापत्तेराह तत्सत्पक्षधर्मिकस्येति। तथा च यावतिमद्व्यापकस्याभावे यस्यासामानाधिकरण्यं तस्य २४

तत्प्रमेयव्याप्तिः विशेषणभेदान्वयमाकांक्षं तेन पदस्य विशेषणत्वाभावेपि न क्षतिः वस्तुमात्रस्यैव साध्यवन्निष्ठाभावप्रतियोगित्वेन प्रतियोगित्वापृथ्वी सि
र्भावत्वं च व्यापकत्वादतिरिक्तं दुर्वचमित्यतो निष्कर्षमाह। तथा चेति एतस्यार्थः प्रागेव प्रपंचितः न त्वेकव्यक्तिवृत्तयो यावंतः साध्यव्यापकतावच्छे
दकरूपावच्छिन्नाभावास्तेषां असामानाधिकरण्यमेवार्थः कुतो न कृत्स्नतद्विपक्षान्यत्वाभावकूटस्यैकव्यक्तिवृत्तित्वाभावादेव तेषामधिकरणाप्रसिद्धा
वपि वह्निमान्धूमादित्यादावव्याप्त्यसंभवादत उत अहं केवलान्वयिनि चेति तथाविधः साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकः न
ध्याच तदधिकरणाप्रसिद्ध्या प्रमेयं वाच्यत्वादित्यादावव्याप्तिर्निरसितापि तादृशार्थस्त्यक्त इति भावः। अत्र वह्निमान्धूमादित्यादावव्याप्तिः। वह्निव्यापकस्य
त इदं तु विशिष्टद्रव्यत्वाद्यभावस्य योऽभावो द्रव्यत्वादिः तत्र धूमादिसामानाधिकरण्यस्य सत्त्वात् भावविरहात्मत्वलक्षणप्रतियोगित्वान्यथानुपपत्त्या द्रव्य
त्वस्यैव विशिष्टद्रव्यत्वाभावाभावरूपत्वात्। अन्यथा गगनस्यापि स्वाभावाभावत्वे प्रमाणाभावात् एकेवलान्वयिन्यव्याप्त्यापत्तेरित्यस्वरसः संप्रदायइ
त्यनेन सूचितः। अत एव तद्दोषं निरस्यतां मतमुपन्यस्यति केचित्विति। साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावसामान्याभाववत्त्वेन यद
धिकरणतया व्यापकत्वं तत्त्वमित्यर्थः सामान्याभावत्वाभावे तु यावत्त्वोपादानं तेन तादृशाभावानां यावत्त्वावच्छिन्नाभावस्य केवलान्वयित्वेपि न धूमवान्वह्नेरि
त्यादवतिप्रसंगः। न चेति वाच्यमित्यनेनान्वयः। तादृशेति साध्यवन्निष्ठाभावीयेत्यर्थः। अननीति साध्यव्यापकतावच्छेदकतया यावत्त्वेनाप्रवेशात् वैयर्थ्यासंग

२१

व्या.वि.८ ८५ वादितिभावः।एकाधिकरणस्येति।तेषां प्रत्येकाश्रयस्यप्रवेशे तु तादृशतत्तद्वह्निमत्वस्य धूमाधिकरणत्वाव्यापकत्वाद्व्याप्तेरसंभवो वेतिभावः।रूपांत
१५ रेणेति।किंचिद्विशिष्टत्वादिना।तथाच तादृशप्रतियोग्यप्रसिद्ध्यैवावच्छेदकांशे निर्विवक्षितइतिभावः।अथ धर्मांशस्य स्वाभावविरहत्वेमानाभावः।स्वरूपसं
बंधविशेषस्यैवप्रतियोगित्वादतः केवलान्वयिन्यव्याप्तिरित्यस्वरसः।केचिदित्यनेनसूचितः।स्वमते साध्यव्यापकतावच्छेदकमावर्ततोध
पद्धर्मा र्मावच्छिन्नव्यापकतावच्छेदकास्तद्धर्मवत्त्वमेवानौपाधिकत्वमितिप्रागेव पूर्वपक्षग्रंथे विवेचितमितिध्येयं।लक्षणयोः पौनरुक्त्यमपाकर्तुं विकल्पयति
अवच्छिन्नमित्यादिना।अनुव्याप्यवच्छेदकस्य धूमत्वादेः सामानाधिकरण्यावच्छेदकत्वरूपव्याप्तित्वानुपपत्तिर्विभिन्नयोरेवावच्छेद्यावच्छेदकभावनियमाद
तआह।इत्थं चेति।दंडत्वादेरिति।तथाचोक्तनियमो व्यभिचारपराहतइतिभावः।नान्विनोपि बाध्यकात् कारणत्वमतीरिक्तः पदार्थ इतिदंडत्वादेस्तदवच्छेदकत्वंसु
घटमेवेत्यत आह।उपहितेति।विशिष्टाविशिष्टेत्यर्थः।समर्थनीयाभिति धूमत्वादेर्व्याप्यतावच्छेदकत्वमिति पूर्वेणान्वयः।भेदादिति ल्यब्लोपे पंचमी।भेदमंगीकृ
त्येत्यर्थः।तथाच शुद्धधूमत्वं व्याप्यवच्छेदकं सामानाधिकरण्यावच्छेदकत्वोपहितं च तदवच्छेद्यमतः केवले विशिष्टभेदोपगमात् नासंगतिरितिभावः।तत्रान
योर्मध्ये साद्गुल्यनेनावच्छेदकपरामर्शे द्वितीयद्वितीयलक्षणाभेदप्रसंगादिसतोव्याचष्टे।सासंबंधीतेति।एवंच मूलेव्याप्त्या संबंधितामात्रावच्छेदकरूपत्वलं
पत्रेत्येवमन्वयो बोध्यः।जनकत्वादिरूपायाः साध्यसंबंधितायाव्याप्त्यत्व विरहादत आह।सामानाधिकरण्येति।जनकत्वादित्यादिपदेन जन्यत्वादेः। ८५ १५

७ प्रमात्मकेति उभयत्रज्ञेयः

रिग्रह इ विशिष्टेति विशिष्टसत्तात्वावच्छिन्नं यद्गुणादिसामानाधिकरण्यं तद्वतः सत्तादेरित्यर्थः गुणाद्यनुमित्यापत्तिरिति । सत्तायां गुणव्यभिचारित्वज्ञानेपि इत्यादिः । क
र्मादिविमनुपज्यते गुणाव्याप्तिमत्वात् सत्वस्य कर्मणि पक्षधर्मत्वान्न पायात् । ननु व्याप्यवच्छिन्नस्य हेतोः पक्षधर्मताज्ञानमनुमितिहेतुरत आह साध्यसामानाधिकर
ण्यविशिष्टस्य सत्वादेः कर्मणि परामर्शे व्यभिचारधीदशायामप्यनुमितिरिष्यत एवेत्यत आह साध्यसामानाधिकरण्येति । प्रागिति । तथाच पक्षे साध्यानिर्णयद
शायां विनानुमितिं सा काचिदपि अनुमितिर्न स्यादिति भावः । ननु धूमत्वादिपद्धर्मावच्छिन्नसामानाधिकरण्यवतो धूमत्वादितत्तद्धर्मप्रकारेणैव पक्षधर्मतानिश्चयो
नुमितिहेतुर्वाच्यः । तथाच कर्मणि तादृशविशिष्टसत्तात्वरूपेण पक्षधर्मत्वानिर्णयान्नेकानुपपत्तिः संभवतीत्यत आह । अयमिति । अयं पक्षवृत्तिः । विशिष्टेति ।
तथाच धूमत्वादिप्रकारेण पक्षधर्मतासंदेहदशायामुक्तप्रकारासंभवात् तदानीमनुमित्युत्पत्त्यर्थमपि हि तीकल्पानुसरणमिति भावः ॥ सामान्यतः साध्यसंबं
धितावच्छेदकत्वप्रकारेण इदं च स्वरूपसंबंधविशेषं

३ ईश्वरलिङ्ग हेतुविशेषज्ञानस्य हेतुत्वादेति भावः

८६

१६

८६